श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीब्राह्मे पुराणे इन्द्रद्युम्न कृता

# ॥ भगवत्स्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ भगवत्स्तुतिः ॥

वासुदेव नमस्तेऽस्तु नमस्ते मोक्षकारण।
त्राहि मां सर्वलोकेश जन्मसंसारसागरात्॥ १ ॥

निर्मलाम्बरसङ्काश नमस्ते पुरुषोत्तम।
सङ्कर्षण नमस्तेऽस्तु त्राहि मां धरणीधर॥ २ ॥

नमस्ते हेमगर्भाभ नमस्ते मकरध्वज।
रतिकान्त नमस्तेऽस्तु त्राहि मां संवरान्तक॥ ३ ॥

नमस्तेऽञ्जनसङ्काश नमस्ते भक्तवत्सल।
अनिरुद्ध नमस्तेऽस्तु त्राहि मां वरदो भव॥ ४ ॥

नमस्ते विबुधावास नमस्ते विबुधप्रिय।
नारायण नमस्तेऽस्तु त्राहि मां शरणागतम्॥ ५ ॥

नमस्ते बलिनां श्रेष्ठ नमस्ते लाङ्गलायुध।
चतुर्मुख जगद्धाम त्राहि मां प्रपितामह॥ ६ ॥

नमस्ते नीलमेघाभ नमस्ते त्रिदशार्चित।
त्राहि विष्णो जगन्नाथ मग्नं मां भवसागरे॥ ७ ॥

प्रलयानलसङ्काश नमस्ते दितिजान्तक।
नरसिंह महावीर्य त्राहि मां दीप्तलोचन॥ ८ ॥

यथा रसातलादुर्वी त्वया दंष्ट्रोद्धृता पुरा।
तथा महावराहस्त्वं त्राहि मां दुःखसागरात्॥ ९ ॥

तवैता मूर्तयः कृष्ण वरदाः संस्तुता मया।
तवेमे बलदेवाद्याः पृथग्रूपेण संस्थिताः॥ १० ॥

www.prapatti.com

अङ्गानि तव देवेश गरुत्माद्यास्तथा प्रभो।
दिक्पालाः सायुधाश्चैव केशवाद्यास्तथाच्युत॥ ११ ॥

ये चान्ये तव देवेश भेदाः प्रोक्ता मनीषिभिः।
तेऽपि सर्वे जगन्नाथ प्रसन्नायतलोचन॥ १२ ॥

मयार्चिताः स्तुताः सर्वे तथा यूयं नमस्कृताः।
प्रयच्छत वरं मह्यं धर्मकामार्थमोक्षदम्॥ १३ ॥

भेदास्ते कीर्तिता ये तु हरे सङ्कर्षणादयः।
तव पूजार्थसम्भूतास्ततस्त्वयि समाश्रिताः॥ १४ ॥

न भेदस्तव देवेश विद्यते परमार्थतः।
विविधं तव यद्रूपमुक्तं तदुपचारतः॥ १५ ॥

अद्वैतं त्वां कथं द्वैतं वक्तुं शक्नोति मानवः।
एकस्त्वं हि हरे व्यापी चित्स्वभावो निरञ्जनः॥ १६ ॥

परमं तव यद्रूपं भावाभाव विवर्जितम्।
निर्लेपं निर्गुणं श्रेष्ठं कूटस्थमचलं ध्रुवम्॥ १७ ॥

सर्वोपाधिविनिर्मुक्तं सत्तामात्रव्यवस्थितम्।
तद्देवाश्च न जानन्ति कथं जानाम्यहं प्रभो॥ १८ ॥

अपरं तव यद्रूपं पीतवस्त्रं चतुर्भुजम्।
शङ्खचक्रगदापाणिमुकुटाङ्गदधारिणम्॥ १९ ॥

श्रीवत्सोरस्कसंयुक्तं वनमालाविभूषितम्।
तदर्चयन्ति विबुधा ये चान्ये तव संश्रयाः॥ २० ॥

देवदेव सुरश्रेष्ठ भक्तानामभयप्रद।
त्राहि मां पद्मपत्राक्ष मग्नं विषयसागरे॥ २१ ॥

नान्यं पश्यामि लोकेश यस्याहं शरणं व्रजे।
त्वामृते कमलाकान्त प्रसीद मधुसूदन॥ २२ ॥



www.prapatti.com

जराव्याधिशतैर्युक्तो नानादुःखैर्निपीडितः।
हर्षशोकान्वितो मूढः कर्मपाशैः सुयन्त्रितः॥ २३ ॥

पतितोऽहं महारौद्रे घोरे संसारसागरे।
विषमोदकदुष्पारे रागद्वेषझषाकुले॥ २४ ॥

इन्द्रियावर्तगंभीरे तृष्णाशोकोर्मिसङ्कुले।
निराश्रये निरालम्बे निःसारेऽत्यन्तचञ्चले॥ २५ ॥

मायया मोहितस्तत्र भ्रमामि सुचिरं प्रभो।
नानाजातिसहस्रेषु जायमानः पुनः पुनः॥ २६ ॥

मया जन्मान्यनेकानि सहस्राण्ययुतानि च।
विविधान्यनुभूतानि संसारेऽस्मिञ्जनार्दन॥ २७ ॥

वेदाः साङ्गा मयाधीताः शास्त्राणि विविधानि च।
इतिहासपुराणानि तथा शिल्पान्यनेकशः॥ २८ ॥

असन्तोषाश्च सन्तोषाः सञ्चयापचया व्ययाः।
मया प्राप्ता जगन्नाथ क्षयवृद्ध्यक्षयेतराः॥ २९ ॥

भार्यारिमित्रबन्धूनां वियोगाः सङ्गमास्तथा।
पितरो विविधा दृष्टा मातरश्च तथा मया॥ ३० ॥

दुःखानि चानुभूतानि यानि सौख्यान्यनेकशः।
प्राप्ताश्च बान्धवाः पुत्रा भ्रातरो ज्ञातयस्तथा॥ ३१ ॥

मयोषितं तथा स्त्रीणां कोष्ठे विण्मूत्रपिच्छले।
गर्भवासे महादुःखमनुभूतं तथा प्रभो॥ ३२ ॥

दुःखानि यान्यनेकानि बाल्ययौवनगोचरे।
वार्धके च हृषीकेश तानि प्राप्तानि वै मया॥ ३३ ॥

मरणे यानि दुःखानि यममार्गे यमालये।
मया तान्यनुभूतानि नरके यातनास्तथा॥ ३४ ॥



www.prapatti.com

कृमिकीटद्रुमाणां च हस्त्यश्वमृगपक्षिणाम्।
महिषोष्ट्रगवां चैव तथान्येषां वनौकसाम्॥ ३५ ॥

द्विजातीनां च सर्वेषां शूद्राणां चैव योनिषु।
धनिनां क्षत्रियाणां च दरिद्राणां तपस्विनाम्॥ ३६ ॥

नृपाणां नृपभृत्यानां तथान्येषां च देहिनाम्।
गृहेषु तेषामुत्पन्नो देव चाहं पुनः पुनः॥ ३७ ॥

गतोऽस्मि दासतां नाथ भृत्यानां बहुशो नृणाम्।
दरिद्रत्वं चेश्वरत्वं स्वामित्वं च तथा गतः॥ ३८ ॥

हतो मया हताश्चान्ये घातितो घातितास्तथा।
दत्तं ममान्यैरन्येभ्यो मया दत्तमनेकशः॥ ३९ ॥

पितृमातृसुहृद्भ्रातृकलत्राणां कृतेन च।
धनिनां श्रोत्रियाणां च दरिद्राणां तपस्विनाम्॥ ४० ॥

उक्तं दैन्यं च विविधं त्यक्त्वा लज्जां जनार्दन।
देवतिर्यङ्मनुष्येषु स्थावरेषु चरेषु च॥ ४१ ॥

न विद्यते तथा स्थानं यत्राहं न गतः प्रभो।
कदा मे नरके वासः कदा स्वर्गे जगत्पते॥ ४२ ॥

कदा मनष्यलोकेषु कदा तिर्यग्गतेषु च।
जलयन्त्रे यथा चक्रे घटी रज्जुनिबन्धना॥ ४३ ॥

याति चोर्ध्वमधश्चैव कदा मध्ये च तिष्ठति।
तथा चाहं सुरश्रेष्ठ कर्मरज्जुसमावृतः॥ ४४ ॥

अधश्चोर्ध्वं तथा मध्ये भ्रमन् गच्छामि योगतः।
एवं संसारचक्रेऽस्मिन् भैरवे रोमहर्षणे॥ ४५ ॥

भ्रमामि सुचिरं कालं नान्तं पश्यामि कर्हिचित्।
न जाने किं करोम्यद्य हरे व्याकुलितेन्द्रियः॥ ४६ ॥

शोकतृष्णाभिभूतोऽहं कान्दिशीको विचेतनः।
इदानीं त्वामहं देव विह्वलः शरणं गतः॥ ४७॥

त्राहि मां दुःखितं कृष्ण मग्नं संसारसागरे।
कृपां कुरु जगन्नाथ भक्तं मां यदि मन्यसे॥ ४८॥

त्वद्धृते नास्ति मे बन्धुर्योऽसौ चिन्तां करिष्यति।
देव त्वां नाथमासाद्य न भयं मेऽस्ति कुत्रचित्॥ ४९॥

जीविते मरणे चैव योगक्षेमेऽथवा प्रभो।
ये तु त्वां विधिवद्देव नार्चयन्ति नराधमाः॥ ५०॥

सुगतिस्तु कथं तेषां भवेत्संसारबन्धनात्।
किं तेषां कुलशीलेन विद्यया जीवितेन च॥ ५१॥

येषां न जायते भक्तिर्जगद्धातरि केशवे।
प्रकृतिं त्वासुरीं प्राप्य ये त्वां निन्दन्ति मोहिताः॥ ५२॥

पतन्ति नरके घोरे जायमानाः पुनः पुनः।
न तेषां निष्कृतिस्तस्माद्विद्यते नरकार्णवात्॥ ५३॥

ये दूषयन्ति दुर्वृत्तास्त्वां देव पुरुषाधमाः।
यत्र यत्र भवेज्जन्म मम कर्मनिबन्धनात्॥ ५४॥

तत्र तत्र हरे भक्तिस्त्वयि चास्तु दृढा सदा।
आराध्य त्वां सुरा दैत्या नराश्चान्येऽपि संयताः॥ ५५॥

अवापुः परमां सिद्धिं कस्त्वां देव न पूजयेत्।
न शक्नुवन्ति ब्रह्माद्याः स्तोतुं त्वां त्रिदशा हरे॥ ५६॥

कथं मानुषबुद्ध्याहं स्तौमि त्वां प्रकृतेः परम्।
तथा चाज्ञानभावेन संस्तुतोऽसि मया प्रभो॥ ५७॥

तत्क्षमस्वापराधं मे यदि तेऽस्ति दया मयि।
कृतापराधेऽपि हरे क्षमां कुर्वन्ति साधवः॥ ५८॥

तस्मात्प्रसीद देवेश भक्तस्नेहं समाश्रितः।
स्तुतोऽसि यन्मया देव भक्तिभावेन चेतसा।
साङ्गं भवतु तत्सर्वं वासुदेव नमोऽस्तु ते॥ ५९ ॥

ब्रह्मोवाच
इत्थं स्तुतस्तदा तेन प्रसन्नो गरुडध्वजः।
ददौ तस्मै मुनिश्रेष्ठाः सकलं मनसेप्सितम्॥ ६० ॥

यः संपूज्य जगन्नाथं प्रत्यहं स्तौति मानवः।
स्तोत्रेणानेन मतिमान् स मोक्षं लभते ध्रुवम्॥ ६१ ॥

त्रिसन्ध्यं यो जपेद्विद्वानिदं स्तोत्रवरं शुचिः।
धर्मं चार्थं च कामं च मोक्षं च लभते नरः॥ ६२ ॥

यः पठेच्छृणुयाद्वापि श्रावयेद्वा समाहितः।
स लोकं शाश्वतं विष्णोर्याति निर्धूतकल्मषः॥ ६३ ॥

धन्यं पापहरं चेदं भुक्तिमुक्तिप्रदं शिवम्।
गुह्यं सुदुर्लभं पुण्यं न देयं यस्य कस्यचित्॥ ६४ ॥

न नास्तिकाय मूर्खाय न कृतघ्नाय मानिने।
न दुष्टमतये दद्यान्नाभक्ताय कदाचन॥ ६५ ॥

दातव्यं भक्तियुक्ताय गुणशीलान्विताय च।
विष्णुभक्ताय शान्ताय श्रद्धानुष्ठानशालिने॥ ६६ ॥

इदं समस्ताघविनाशहेतुः
 कारुण्यसंज्ञं सुखमोक्षदं च।
अशेषवाञ्छाफलदं वरिष्ठं
 स्तोत्रं मयोक्तं पुरुषोत्तमस्य॥ ६७ ॥

ये तं सुसूक्ष्मं विमला मुरारिं
 ध्यायन्ति नित्यं पुरुषं पुराणम्।


www.prapatti.com

ते मुक्तिभाजः प्रविशन्ति विष्णुं
    मन्त्रैर्यथाज्यं हुतमध्वराग्नौ॥ ६८ ॥

एकः स देवो भवदुःखहन्ता
    परः परेषां न ततोऽस्ति चान्यत्।
द्रष्टा स पाता स तु नाशकर्ता
    विष्णुः समस्ताखिलसारभूतः॥ ६९ ॥

किं विद्यया किं स्वगुणैश्च तेषां
    यज्ञैश्च दानैश्च तपोभिरुग्रैः।
येषां न भक्तिर्भवतीह कृष्णे
    जगद्गुरौ मोक्षसुखप्रदे च॥ ७० ॥

लोके स धन्यः स शुचिः स विद्वान्
    मखैस्तपोभिः स गुणैर्वरिष्ठः।
ज्ञाता स दाता स तु सत्यवक्ता
    यस्यास्ति भक्तिः पुरुषोत्तमाख्ये॥ ७१ ॥

॥ इति भगवत्स्तुतिः संपूर्णा ॥

www.prapatti.com